श्री आंजनेय नवरत्नमाला स्तोत्रं

श्री आंजनेय नवरत्नमाला स्तोत्रं

माणिक्यं –

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः |
इयेष पदमन्वेष्टुं चारणाचरिते पथि || 1 ||

मुत्यं –

यस्य त्वेतानि चत्वारि वानरेंद्र यथा तव |
स्मृतिर्मतिर्धृतिर्दाक्ष्यं स कर्मसु न सीदति || 2 ||

प्रवालं –

अनिर्वेदः श्रियो मूलं अनिर्वेदः परं सुखं |
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः || 3 ||

मरकतं –

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै |
नमोऽस्तु रुद्रेंद्रयमानिलेभ्यः
नमोऽस्तु चंद्रार्कमरुद्गणेभ्यः || 4 ||

पुष्यरागं –

प्रियान्न संभवेद्दुःखं अप्रियादधिकं भयं |
ताभ्यां हि ये वियुज्यंते नमस्तेषां महात्मनां || 5 ||

हीरकं –

रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः |
रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे || 6 ||

इंद्रनीलं –

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः |

राजा जयति सुग्रीवो राघवेणाभिपालितः |

दासोऽहं कोसलेंद्रस्य रामस्याक्लिष्टकर्मणः |

हनुमान् शत्रुसैन्यानां निहंता मारुतात्मजः || 7 ||

गोमेधिकं –

यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः |

यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः || 8 ||

वैडूर्यं –

निवृत्तवनवासं तं त्वया सार्धमरिंदमं |

अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवं || 9 ||

इति श्री आंजनेय नवरत्नमाला स्तोत्रं |